# आदर्शभूतः संस्कृतग्रामः

## आमुखम्

अध्यापिका कक्ष्यायां कस्यचित् परिवारस्य चित्रं छात्राणां पुरतः स्थापयित्वा संस्कृतगृहम् इति उपस्थाप्य 'चित्रे किं किम् अस्ति?' इति पृच्छतु। 'चित्रे गृहम् अस्ति, मातामही अस्ति' इत्यादीनि संस्कृतवाक्यानि वक्तुं छात्राः प्रभवन्ति। एवं संस्कृतगृहे सर्वे संस्कृतेन भाषणं कुर्वन्ति इति अध्यापिका प्रस्तौति। 'संस्कृतगृहे संस्कृतेन गीतं, संस्कृतेन क्रीडा, किमधिकं चिन्तनमपि ते संस्कृतेन कुर्वन्ति। एतादृशानि संस्कृतगृहाणि बहूनि सन्ति चेत् सः प्रदेशः संस्कृतदेशः भवति खलु। तादृशः देशः अस्माकं राज्ये कुत्रापि अस्ति वा? किं भवन्तः जानन्ति?' इति अध्यापिका पृच्छतु। तादृशं देशम् अधिकृत्य पठामः इत्युक्त्वा पाठं प्रविशतु।

| | | |
|---|---|---|
| पाठस्य नाम | - | आदर्शभूतः संस्कृतग्रामः। |
| उद्देश्यम् | - | संस्कृतं व्यवहारभाषास्ति।<br>संस्कृतभाषापठनतात्पर्यवर्धनार्थं पाठोऽयं आयोजितः। |
| कालांशः | - | १२ |
| आधारग्रन्थसूची | - | ड़ॉ. मुत्तलपुरं मोहनदानस्य यात्राविवरणम्। |

**www.samkritabharati.org**

**असाध्यं कथं साधयति, Asmitha publications, Calicut**

| आशयाः / धारणाः / व्यवहाररूपाणि | पठनप्रवर्तनानि / पठनतन्त्राणि | पठनाधिगमाः |
|---|---|---|
| पदानाम् अर्थज्ञानम्। | पदार्थचयनं करोति। | पाठं पठित्वा नूतनपदानाम् अर्थं लिखति। |
| सम्भाषणम्। | सम्भाषणरचनां करोति। | ललितपदान्युपयुज्य संस्कृतेन संम्भाषणपाटवम् आर्जयति। |
| प्रश्नावलीनिर्माणम्। | प्रश्नावलीनिर्माणं करोति। | पाठभागं पठित्वा प्रश्नावलीनिर्माणं करोति। उचितमुत्तरं पूरयति। |
| विवरणम्। | लघुविवरणं करोति। | विवरणं पठित्वा यात्राविवरणं लिखति। |

**पठनप्रवर्तनम् - १**

**समानार्थपदानां चयनम्।**

**उद्देश्यम्** - पदानाम् अर्थज्ञानम्।

**प्रक्रिया**

छात्राः पाठभागं द्विवारं पठन्तु। ततः सङ्घशः नूतनपदानि तेषाम् अर्थं च अवगच्छन्तु। टिप्पणीपुस्तके लिखन्तु। लिखितानि पदानि कक्ष्यायाम् अवतारयन्तु।

अध्यापिका कानिचन पदानि श्यामफलके लिखतु। छात्राः वैयक्तिकरूपेण तेषां समानार्थकपदानि पाठभागात् चित्वा लिखन्तु।

| पदानि | चितानि पदानि |
|---|---|
| शब्दाः | ध्वनयः |
| वार्ताः | वृत्तान्ताः |
| भाषातत्पराः | भाषासु कुतुकिनः |
| विस्तारः | विस्तृतिः |
| अन्ये जनाः | इतरे जनाः |

**मूल्यनिर्णयसूचिकाः**

उचितपदार्थविवेचनम्।

सर्वेषां भागभागित्वम्।

अर्थज्ञानम्।

**प्रवर्तनम् - २**

**चित्रं निरीक्ष्य सम्भाषणलेखनम्।**

**उद्देश्यम्** - सरलसंस्कृतपदान्युपयुज्य सम्भाषणपाटवम्।

**प्रक्रिया**

अध्यापिका पठनप्रवर्तने आयोजितं चित्रं निरीक्षितुं छात्रान् निर्दिशतु। चित्रे किं किं पश्यन्ति इति पृच्छतु। छात्राः सङ्घे स्थित्वा चित्रे दृष्टानां वस्तूनां नामानि वदन्तु। छात्राः शाकादीनां केषाञ्चन व्यञ्जनानां च नामानि वदन्ति।

शिग्रुः, अलाबुः, भेण्डाः, रक्तफलम्, कदली, वृन्ताकं, हरितम्, चणकः, तण्डुलः, लशुनम्, पलाण्डुः, आलूः, कारवेलम्, मरीचिका

चित्रं निरीक्ष्य संभाषणरचनायै निर्दिशतु -

आपणिकेन सह सम्भाषणम् -

राजेशः वस्तूनि क्रेतुम् आपणं गच्छति। आपणिकेन साकं संस्कृतेन व्यवहरति।

राजेशः - सुप्रभातम्।

आपणिकः - सुप्रभातम्। भवतः किमावश्यकम्।

राजेशः - इमानि शाकानि भवानेव उत्पादयति वा?

आपणिकः - अस्माकं ग्रामीणेषु अधिकाः कृषकाः एव। तैः उत्पादितानि इमानि।

राजेशः - अस्य कारवेलस्य मूल्यं किम्?

आपणिकः - एतस्य त्रिंशत् रूप्यकाणि।

राजेशः - एककिलोमितस्य रक्तफलस्य मूल्यं किम्?

आपणिकः - विंशति एव। कियदावश्यकम्?

राजेशः - एककिलोपरिमितं रक्तफलं ददातु। एककिलोमितं कूष्माण्डकं, सूरणं, उर्वारुकं चापि भवतु।

आपाणिकः - (पृष्टानि शाकानि गृहीत्वा) स्वीकरोतु इदम्। आहत्य नवतिः रूप्यकाणि।

राजेशः - भवतु, स्वीकरोतु। धन्यवादः।

**मूल्यनिर्णयसूचिका**

उचितसन्दर्भानुसारं सम्भाषणसामर्थ्यम्।

**प्रवर्तनम् - ३**

**प्रश्नावलीपूरणम्।**

**उद्देश्यम्** - पाठभागं सम्यग्ज्ञात्वा उचितोत्तरलेखनम्।

प्रक्रिया

अध्यापिका कक्ष्यायाः छात्रमेकम् आहूय - 'एषः कश्चित् अपरिचितः इति भावयतु। एषः कः? कुत्रत्यः? किम् अस्य आगमनकारणम् एतत्किमपि न जानन्ति। अतः एतमुद्दिश्य प्रश्नान् पृच्छन्तु' इति वदतु।

**प्रश्नकरणम्।**

| | | | |
|---|---|---|---|
| भवान् | नाम | किम् | अस्ति |
| | | कुत्र | |
| | | कति | आगतवान् |
| भवतः | गृहं | कुतः | चिन्तयति |
| | | किमर्थम् | जन्म प्राप्तवान् |
| | | कथम् | वसति |
| | | कदा | |
| | | कस्मिन् राज्ये | |
| | | कस्यां जिल्लायां | |
| | | कियद् दूरे | |
| | | कस्याः पुत्रः | |

ततः पाठभागस्थानां प्रश्नानाम् उत्तरलेखनाय निर्दिशति।

क्रमसंख्या -

| | |
|---|---|
| १ ग्रामस्य नाम | मत्तूर्। |
| २ कस्मिन् राज्ये? | कर्णाटके। |
| ३ कस्यां जिल्लायाम्? | शिवमुग्गा जिल्लायाम्। |
| ४ कस्याः नद्यास्तीरे? | तुङ्गभद्रायाः। |
| ५ जिल्लाकेन्द्रात्कियद्दूरे? | अष्ट कि.मि. परिमिते दूरे। |
| ६ ग्रामविस्तृतिः? | त्रिसहस्रं एकर् मिता भवति। |
| ७ ग्रामे जनसंख्या? | पञ्चसहस्रं भवेत्। |
| ८ जनानां व्यवहारभाषा? | संस्कृतम्। |
| ९ संस्कृतप्रचारणकार्यक्रमाः कस्मिन् वर्षे प्रारब्धाः? | १९८२ तमे वर्षे प्रारब्धाः। |

**मूल्यनिर्णयसूचिका:**

वाक्यघटना।

प्रश्नस्वरूपम्।

प्रश्नानुकूलमुत्तरम्।

**प्रवर्तनम्** ४

**यात्राविवरणम्।**

**उद्देश्यम्** - यात्राविवरणलेखनसामर्थ्यम्।

**प्रक्रिया**

अध्यापिका कक्ष्यां प्रविश्य यात्रासम्बन्धिनः प्रश्नान् पृच्छतु।

अध्यापिका - विरामकाले भवन्तः यात्रां कुर्वन्ति वा?

छात्राः - आम्।

अध्यापिका - विनोदयात्रां कुर्वन्ति वा?

लता - महोदये, अहं बन्धुभिः साकं गते मेय्मासे तेक्कटीम् अगच्छम्। यात्रा आनन्ददायिका आसीत्।

मीरा - अहमपि गतवती आसम्। रामेश्वरं, मधुरा, पलनी इत्यादीनि स्थलानि दृष्टानि।

ततः सूचनानुसारम् यात्राविरणलेखनाय अध्यापिका प्रेरयति।

सूचना - तिथि, स्थलम्, समयः, कति जनाः, यानम्, कतिदिनपरिमितम्, दृष्टानि कार्याणि वस्तूनि च, प्रत्यागमनसमयः।

वयं २०/ १२/ २०१३ तमे दिने प्रातः षड्वादने तिरुवनन्तपुरतः रेल्याने यात्राम् आरब्धवन्तः। सायं चतुर्वादने पालक्काट्नगरं प्राप्तवन्तः। विश्रान्त्यनन्तरं ततः मलम्पुषां अगच्छाम। तत्रत्यम् उद्यानम्, अन्यानि दृश्यानि च दृष्ट्वा रात्रौ पालक्काट् नगरं प्रत्यागत्य तत्रैव उषितवन्तः। अन्येद्युः प्रभाते प्रथमदर्शनस्थानं सैलन्ट् वाली आसीत्। तत्र बहून् पशून् खगान् च दृष्टवन्तः। तत्र वंशनाशभीतिमनुभवन्तः *सिंहवालन्वानराः* अपि आसन्।

ततः सायं वयम् आलप्पुषां प्राप्तवन्तः। तत्रत्याः नौकायात्रा चित्ताह्लादिनी अभवत्। अविस्मरणीयः सः अनुभवः। अनन्तरदिने वयं प्रातः तिरुवनन्तपुरं प्रत्यागतवन्तः च।

**मूल्यनिर्णयसूचिका**

विवरणसामर्थ्यम्।

उचिता भाषा।

### अधिकविस्तारांशः।

१९८१ तः आरभ्य संस्कृतसंभाषणान्दोलनं भारते प्रचलति। अल्पदिनैः अल्पैः शब्दैः सरलया सर्वजनावगमनया शैल्या जनान् संस्कृतसंभाषणं पाठयितुं सक्षमा पद्धतिः तदर्थमाविष्कृता। सैव पद्धतिः मत्तूर्ग्रामे प्रवृत्तिपथमानीता। मध्यप्रदेशस्य झिरि मोहद् इत्यनयोः ग्रामयोः राजस्थानस्य गानौडाग्रामे च नवीनपरीक्षणमिदं प्रयुक्तम्। भाषापुनरुज्जीवनद्वारा संस्कृतिपुनरुज्जीवनमिति महान्तमाशयं शिरसि निधाय कार्यस्थाः सहस्रशः युवतीयुवकाः एव अस्य शिल्पिनः।